श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ द्व्यशीतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्व्यशीतितमः सर्गः ॥

## हनुमन्नायकत्वे वानराणां रक्षसां च युद्धम्, हनुमतः श्रीरामपार्श्वे निवर्तनमिन्द्रजिता निकुम्भिलामुपेत्य यज्ञस्यानुष्ठानं च

श्रुत्वा तु भीमनिर्ह्रादं शक्राशनिसमस्वनम्।
वीक्ष्यमाणा दिशः सर्वा दुद्रुवुर्वानरा भृशम्॥ **6.82.1** ॥

तानुवाच ततः सर्वान् हनूमान् मारुतात्मजः।
विषण्णवदनान् दीनांस्त्रस्तान् विद्रवतः पृथक्॥ **6.82.2** ॥

कस्माद् विषण्णवदना विद्रवध्वं प्लवङ्गमाः।
त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम्॥ **6.82.3** ॥

पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे।
शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम्॥ **6.82.4** ॥

एवमुक्ताः सुसङ्क्रुद्धा वायुपुत्रेण धीमता।
शैलशृङ्गान् द्रुमांश्चैव जगृहुर्हृष्टमानसाः॥ **6.82.5** ॥

अभिपेतुश्च गर्जन्तो राक्षसान् वानरर्षभाः।
परिवार्य हनूमन्तमन्वयुश्च महाहवे॥ **6.82.6** ॥

स तैर्वानरमुख्यैस्तु हनूमान् सर्वतो वृतः।
हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम्॥ **6.82.7** ॥

स राक्षसानां कदनं चकार सुमहाकपिः।
वृतो वानरसैन्येन कालान्तकयमोपमः॥ **6.82.8** ॥

स तु शोकेन चाविष्टः कोपेन महता कपिः।
हनूमान् रावणिरथे महतीं पातयच्छिलाम्॥ **6.82.9** ॥

तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा।
विधेयाश्वसमायुक्तः विदूरमपवाहितः॥ **6.82.10** ॥

तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम्।
विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता॥ **6.82.11** ॥

पतितायां शिलायां तु व्यथिता रक्षसां चमूः।
निपतन्त्या च शिलया राक्षसा मथिता भृशम्॥ **6.82.12** ॥

तमभ्यधावञ्शतशो नदन्तः काननौकसः।
ते द्रुमांश्च महाकाया गिरिशृङ्गाणि चोद्यताः॥ **6.82.13** ॥

क्षिपन्तीन्द्रजितं सङ्ख्ये वानरा भीमविक्रमाः।
वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः॥ **6.82.14** ॥

शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वनैः।
वानरैस्तैर्महाभीमैर्घोररूपा निशाचराः॥ **6.82.15** ॥

वीर्यादभिहता वृक्षैर्व्यचेष्टन्त रणक्षितौ।
स सैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित्॥ **6.82.16** ॥

प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ।
स शरौघानवसृजन् स्वसैन्येनाभिसंवृतः॥ **6.82.17** ॥

जघान कपिशार्दूलान् सुबहून् दृढविक्रमः।
शूलैरशनिभिः खड्गैः पट्टिशैः शूलमुद्गरैः॥ **6.82.18** ॥

ते चाप्यनुचरांस्तस्य वानरा जघ्नुराहवे।
सुस्कन्धविटपैः शैलैः शिलाभिश्च महाबलः॥ **6.82.19** ॥

हनूमान् कदनं चक्रे रक्षसां भीमकर्मणाम्।
सन्निवार्य परानीकमब्रवीत् तान् वनौकसः॥ **6.82.20** ॥

हनूमान् सन्निवर्तध्वं न नः साध्यमिदं बलम्।
त्यक्त्वा प्राणान् विचेष्टन्तो रामप्रियचिकीर्षवः॥ **6.82.21** ॥

यन्निमित्तं हि युध्यामो हता सा जनकात्मजा।
इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च॥ **6.82.22** ॥

तौ यत् प्रतिविधास्येते तत् करिष्यामहे वयम्।
इत्युक्त्वा वानरश्रेष्ठो वारयन् सर्ववानरान्॥ **6.82.23** ॥

शनैः शनैरसन्त्रस्तः सबलः सन्न्यवर्तत।
ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः॥ **6.82.24** ॥

स होतुकामो दुष्टात्मा गतश्चैत्यं निकुम्भिलाम्।
निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित्॥ **6.82.25** ॥

यज्ञभूम्यां ततो गत्वा पावकस्तेन रक्षसा।
हूयमानः प्रजज्वाल होमशोणितभुक् तदा॥ **6.82.26** ॥

सार्चिःपिनद्धो ददृशे होमशोणिततर्पितः।
सन्ध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः॥ **6.82.27** ॥

अथेन्द्रजिद् राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित्।
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः॥ **6.82.28** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे द्व्यशीतितमः सर्गः॥